वृद्धदारु, क्ली, (वृद्धत्वनाशकं दारु यस्य ।) वृद्धदारकवृक्षः । यथा, राजनिर्घण्टे ।
"वृद्धदारुद्वयं गौल्यं पिच्छिलं कफवातनुत् ।
बल्यं कासामदोषघ्नं द्वितीयं स्वल्पवीर्य्यदम् ॥"

वृद्धनाभिः, त्रि, (वृद्धः प्रवृद्धो नाभिर्यस्य ।) उन्नतनाभिः । गोँड़नाभियुक्तव्यक्ति इति भाषा । तत्पर्य्यायः । तुन्दिलः २ तुन्दिभः ३ । इत्यमरः ॥

वृद्धप्रपितामहः, पुं, (प्रपितामहाद्वृद्धः ।) प्रपितामहतातः । इति शब्दरत्नावली ॥ तत्र कन्यायाः सपिण्डता नास्ति । यथा । तेनात्मपञ्चमे वृद्धप्रपितामहे सापिण्ड्यं निवर्त्तते इति प्रतिपादितम् । अतएव प्रपितामहभ्रात्रा तत्सन्ततिभिः सह सापिण्ड्याभावात् कन्याजननमरणयोस्तेषां सपिण्डाशौचं नास्ति किन्तु समानोदकनिमित्तमेवाशौचमिति । इति शुद्धितत्त्वम् ॥

वृद्धबला, स्त्री, (वृद्धा बला ।) महासमङ्गा । इति राजनिर्घण्टः ॥

वृद्धराजः, पुं, अम्लवेतसः । यथा,—
"अत्यम्लो वृद्धराजश्च द्वावेतौ तत्र कीर्त्तितौ ।"
इति केचित् ॥

वृद्धवाहनः, पुं, आम्रवृक्षः । यथा । सुपक्वो वृद्धवाहनः । इति केचित् ॥

वृद्धविभीतकः, पुं, (वृद्धः प्रवृद्धो विभीतक इव ।) आम्रातकः । इति शब्दमाला ॥

वृद्धश्रवाः, [स्] पुं, (वृद्धात् वृहस्पतेः शृणोतीति । श्रु+असुन् । "वृद्धेभ्यः शृणोतीति वृद्धश्रवाः ।" इत्युज्ज्वलदत्तः । ४ । २२६ । "वृद्धं प्रभूतं श्रवः श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य ।" इति ऋग्भाष्ये सायणः । १ । ८९ । ६ । "वृद्धं श्रवो धनं कीर्त्तिर्वा यस्य ।" इति वेददीपे महीधरः । १० । ९ ।) इन्द्रः । इत्यमरः ॥

वृद्धसंघः, पुं, वृद्धानां समूहः । तत्पर्य्यायः । वार्द्धकम् । इत्यमरः । २ । ६ । ४० ॥

वृद्धसूत्रकं, क्ली, (वृद्धस्य सूत्रम् । ततः स्वार्थे कन् ।) इन्द्रतूलम् । बुड़ीर सूता इति भाषा । यथा, हारावल्याम् ।
"वृद्धसूत्रकमित्याहुरिन्द्रतूलं मनीषिणः ।
ग्रीष्महासं वंशकफं वाततूलं मरुद्ध्वजम् ॥"

वृद्धा, स्त्री, (वृद्ध+टाप् ।) गतयौवना । बुड़ी इति भाषा । तत्पर्य्यायः । पलिक्नी २ । इत्यमरः ॥ पलिता ३ । इति भरतः ॥ स्थविरा ४ निष्कला ५ जरती ६ गतार्त्तवा ७ । इति राजनिर्घण्टः ॥ तदवस्थाकालो यथा,—
"आषोड़शाद्भवेद्बाला तरुणी त्रिंशता मता ।
पञ्चपञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम् ॥"
इति कालिदासः ॥ * ॥
अपि च ।
"बालेति गीयते नारी यावद्वर्षाणि षोड़श ।
ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि ॥
तदूर्द्धमधिरूढ़ा स्यात् पञ्चाशद्वत्सरावधि ।
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्ज्जिता ॥"
इति भावप्रकाशः ॥ * ॥

तस्याः सम्भोगे दोषो यथा,—
"बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥
नार्त्तवे षोड़शाद्वर्षात् सप्तत्याः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
पञ्चपञ्चाशतो नारी सप्तसप्ततितः पुमान् ।
द्वावेतौ न प्रसूयेते प्रसूयेते विपर्य्ययात् ॥"
इति राजवल्लभः ॥ * ॥
"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥"
इति चाणक्यम् ॥ * ॥
अङ्गुष्ठः । इति शब्दरत्नावली ॥ महाश्रावणिका । इति राजनिर्घण्टः ॥

वृद्धाङ्गुलिः, स्त्री, (वृद्धा अङ्गुलिः ।) हस्तपादयोः स्थूलाङ्गुलिः । बुड़ आङ्गुल इति भाषा । तत्पर्य्यायः । अङ्गुष्ठः २ वृद्धा ३ । इति शब्दरत्नावली ॥

वृद्धिः, स्त्री, (वृध+क्तिन् ।) अष्टवर्गान्तर्गतौषधविशेषः । तत्पर्य्यायः । योग्या २ ऋद्धिः ३ सिद्धिः ४ लक्ष्मीः ५ । इत्यमरः ॥ पुत्रदा ६ वृद्धिदात्री ७ मङ्गल्या ८ श्रीः ९ सम्पत् १० आशीः ११ जनेष्टा १२ भूतिः १३ सुत् १४ सुखम् १५ जीवभद्रा १६ । अस्या गुणाः ।
"ऋद्धिर्वृद्धिश्च मधुरा सुस्निग्धा तिक्तशीतला ।
रुचिमेधाकरी श्लेष्मकुष्ठक्रिमिहरा परा ॥
प्रयोगेष्वनयोरेकं यथालाभं प्रयोजयेत् ।
तत्र यद्यानुमितिः स्याद्द्वयमप्यत्र योजयेत् ॥"
इति राजनिर्घण्टः ॥ * ॥
ऋद्धिवृद्ध्योरुत्पत्तिलक्षणनामगुणाः ।
"ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोषयामले ।
श्वेतलोमान्वितः कन्दो लताजातः सरन्ध्रकः ॥
स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्ब्रुवे ।
तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा ॥
वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः ।
ऋद्धिर्योग्या सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ॥
ऋद्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः ।
प्राणैश्वर्य्यकरी मूर्च्छारक्तपित्तविनाशिनी ॥
वृद्धिर्गर्भप्रदा शीता वृंहणी मधुरा स्मृता ।
वृष्या पित्तास्रशमनी क्षतकासक्षयापहा ॥
राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्लभः ।
तस्मादस्य प्रतिनिधिं गृह्णीयात्तद्गुणं भिषक् ॥"
सुखसहायः प्रतिनिधिः ॥ * ॥ एतस्य प्रतिनिधिमाह ।
"मेदा जीवककाकोल्यौ ऋद्धिद्वन्द्वेऽपि चासति ।
वरीविदार्य्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत् ॥"
मेदा महामेदास्थाने शतावरीमूलं जीवकर्षभकस्थाने विदारीमूलं काकोलीक्षीरकाकोलीस्थानेऽश्वगन्धामूलं ऋद्धिवृद्धिस्थाने वाराहीकन्दं गुणैस्तत्तुल्यं क्षिपेत् । इति भावप्रकाशः ॥ * ॥
नीतिवेदिनां क्षयादित्रिवर्गान्तर्गतवर्गविशेषः । इत्यमरः ॥ नीतिवेदिनां नीतिशास्त्रज्ञानां क्षयादिभिस्त्रिवर्गः । अन्येषान्तु धर्म्मकामार्थैः पूर्व्वमुक्तः । अष्टवर्गस्यापचयः क्षयः । तस्यैवोपचयो वृद्धिः । तस्य नोपचयो नाप्यपचयः स्थानम् । अष्टवर्गो यथा,—
कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ।
कन्याकरबलादानं सैन्यानाञ्च निवेशनम् ॥
अष्टवर्गः स्मृतो राज्ञामिति भरतः ॥ * ॥
वर्द्धनम् । तत्पर्य्यायः । स्फातिः २ । इत्यमरः ॥ (यथा, मनुः । १२ । १२४ ।
"एष सर्व्वाणि भूतानि पञ्चभिर्व्याप्य मूर्त्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥")
विष्कम्भादिसप्तविंशतियोगान्तर्गतैकादशयोगः । तत्र जातफलं यथा,—
"प्रसूतिकाले यदि वृद्धियोगो
नरः सुभोगी विनयान्वितश्च ।
धनप्रयोगग्रहणेषु दक्षो
विचक्षणः स्यात् क्रयविक्रयाभ्याम् ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
कलान्तरम् । सुद इति भाषा । अभ्युदयः । समृद्धिः । इति मेदिनी ॥ (यथा, शिशुपालवधे । १५ । १ ।
"अथ तत्र पाण्डुतनयेन
सदसि विहितं मधुद्विषः ।
मानमसहत न चेदिपतिः
परवृद्धिमत्सरि मनो हि मानिनाम् ॥")
वृद्धिग्रहणनियमो यथा,—
"अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके ।
वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा ॥"
मासि मासि प्रतिमासं बन्धकं विश्वासार्थं यदाधीयते आधिरिति यावत् । बन्धकेन सह वर्त्तत इति सबन्धकः प्रयोगस्तस्मिन् सबन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिर्धर्म्या भवति । अन्यथा बन्धकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वित्रिचतुःपञ्चकं शतं धर्म्म्यं भवति । ब्राह्मणेऽधमर्णे द्विकं शतम् । क्षत्रिये त्रिकम् । वैश्ये चतुष्कम् । शूद्रे पञ्चकम् । मासि मासीत्येव । द्वौ वा त्रयो वा चत्वारो वा पञ्च वा इति द्वित्रिचतुःपञ्चाः । द्वित्रिचतुःपञ्चा अस्मिन् शते वृद्धिर्दीयत इति द्वित्रिचतुःपञ्चकं शतम् । तदस्मिन् वृद्ध्या यल्लाभशुल्कोपदा दीयते इति कन् । इयं वृद्धिर्मासि मासि गृह्यत इति कालिका । एवमेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्यमाणा कायिका भवति । तथा च नारदेन ।
"कायिका कालिका चैव कारिता च तथा परा ।
चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्व्विधा ॥"
इत्युक्तम् ॥
"कायाविरोधिनी शश्वत् पणपादादि कायिका ।
प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मता ॥
वृद्धिः सा कारिता नाम ऋणिकेन स्वयं कृता ।
वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति ॥"